SNITHIKA ❀ ISSN : 2454-2881 VOL – 2026

आइ. एस्. एस्. एन् : २४५४-२८८१

स्नीथिका

अन्ताराष्ट्रीया सममूल्याङ्किता वार्षिकी बहुभाषिका बहुविषयिका शोधपत्रिका
(पुनरीक्षिता)

संख्या – २०२६

(भागः – १)

प्रधानसम्पादकः

आचार्यः प्रह्लादः रा. जोशी

माननीयः कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, असमप्रदेशः

सम्पादकः

डॉ. देवव्रतबाडइ

प्रकाशकः

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

नलबाडी, असमप्रदेशः, भारतवर्षः

२०२६

- संस्कृतनाट्यशास्त्रस्य उत्पत्तेः इतिहासः तथा विकासपरम्परा पृ. - १६२
  ✍ ..... अञ्जन कुमार विश्वासः
- डॉ. विश्वनारायणशास्त्रिण अविनाशि-इत्युपन्यासे साहित्यिकप्रमूल्यास्यान्वेषणम् पृ. - १७१
  ✍ ..... डॉ. रुणिमा शर्मा
- अर्वाचीनसंस्कृतसाहित्ये अभिराजराजेन्द्रमिश्र प्रणीतस्य 'जानकी-जीवनम्' महाकाव्यस्य एकं समीक्षणम् पृ. - १८१
  ✍ ..... डॉ. देवव्रतबाडइ
- शङ्करदेवमहाकाव्ये प्रकृतिचित्रणम् पृ. - १८८
  ✍ ..... नीता देवी
- कुट्टनीमते प्रतिबिम्बिताः कलाविद्याः - एकं समीक्षात्मकम् अध्ययनम् पृ. - १९२
  ✍ ..... राजुकरः, डॉ. देवव्रतबाडइ
- रामचन्द्रसूरिप्रणीतं रघुविलासनाटके तत्कालीकसमाजस्य धार्मिकं स्थितिः तथा नारीणां स्थानविषये एकं विश्लेषणात्मकमध्ययनम् पृ. - २००
  ✍ ..... हिमाद्री अधिकारी, डॉ. देवव्रतबाडइ
- न्यायनये प्रमाणतत्त्वनिर्वचनम् पृ. - २०७
  ✍ ..... डॉ. जगत् ज्योति पात्रः
- न्यायदर्शनदिशा बन्धमोक्षस्वरूपम् पृ. - २१६
  ✍ ..... डॉ. कमलाकान्त मिस्त्री
- उपक्रमाधिकरणन्यायनिरूपणम् पृ. - २२०
  ✍ ..... महेश चिदम्बर भट्टः
- सेश्वरदर्शनेषु ईश्वरतत्त्वस्वरुपम् - एकम् अध्ययणम् पृ. - २२५
  ✍ ..... डॉ. काञ्चन वर्मन
- हरिरामविरचिते अनुमितिपरामर्शविचारग्रन्थे व्याप्यविशेष्यकपक्षविशेष्यक-परामर्शयोः हेतुताविचारः पृ. - २३१
  ✍ ..... डॉ. देवजित् दासः

उपक्रमाधिकरणन्यायनिरूपणम्

महेश चिदम्बर भट्टः
सहायकाचार्यः, संस्कृतवेदाध्ययनविभागः
कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमः

प्राप्तम् - २८/०२/२०२६ परिमार्जितम् - १०/०३/२०२६ स्वीकृतम् - १५/०४/२०२६

सारांशः

शबरस्वामिभिः विरचितं मीमांसाभाष्यं शाबरभाष्यमिति नाम्ना प्रासिद्ध्यत् । एवं भाट्टमतप्रवर्तकाः कुमारिलभट्टपादाः । तेषां मतानुयायिनः खण्डदेवाचार्याः द्वादशाध्यायान् भाट्टदीपिकाख्ये ग्रन्थे उल्लिलिखुः । एवमत्र उभयत्र उपक्रमाधिकरणमिति तृतीयाध्यायस्य तृतीयपादस्य आदिममधिकरणं भवति । तदत्र निरूप्यते । अङ्गताबोधकप्रमाणानि षट् वर्तन्ते – श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि । तत्र वाक्यलक्षणमस्मिन् लेखे निरूप्यते । तथा उच्चैः ऋचा क्रियते इत्यादिवाक्यार्थनिरूपणमपि क्रियते । तत्र असञ्जातविरोधित्वन्यायः सिध्यति । अतः सः न्यायः एवमत्र अधिकरणे आगम्यमानाः तत्सम्बद्धाः अन्ये न्यायाः अपि निरूपिताः वर्तन्ते । एवमत्र भाष्यानुसारेण तथा भाट्यदीपिकानुसारेण च विषयाः निरूप्यन्ते ।

मुख्यशब्दाः - उपक्रमाधिकरणम्, अङ्गत्वम्, उच्चैष्ट्वम्, वेदः, मन्त्रः ।

जैमिनिमहर्षिणः वेदवाक्यार्थनिर्णयार्थं प्रवृत्तं मीमांसाशास्त्रं सूत्रस्थमकार्षुः । तत्सूत्रव्याख्यानात्मकं मीमांसाभाष्यं शबरस्वामिनः व्यरचयन् । वस्तुतः एतेषां पौरस्त्यं नाम आदित्यदेवः इत्यासीत् । वेदमार्गानुयायिनां हन्तृभ्यः बौद्धेभ्यः भीताः वेदमार्गारिरक्षिषवः इमे अरण्यं गत्वा शबरवृत्या जीवनं यापयामासुः । तद्धेतोः एतेषां नाम शबरस्वामीति अजायत । एवं शबरस्वामिभिः कृतत्वात् इदं भाष्यं शाबरभाष्यमिति नाम्ना प्रासिध्यत् ।

मीमांसाशास्त्रे त्रयः वार्तिककाराः भवन्ति । कुमारिलभट्टपादाः, प्रभाकरमिश्रः, मुरारिमिश्रः चेति । तत्र भट्टपादैः यत् मतमाश्रितं तत् भाट्टमतमिति नाम्ना प्रासिध्यत् । गुरुमतम् अथवा प्राभाकरमतमिति प्रभाकरमिश्राणां मतं प्रासिधत् । मिश्रमतमिति तृतीयं मतम् । एतेषु प्रसिद्धं भाट्टमतम् । तदवलम्ब्य खण्डदेवाचार्याः भाट्टकौस्तुभम्,